# CCE –RF

## I language Sanskrit 16-S

## Model Question Paper

**Marks - 100** **समयः –3 घण्टाः**

### भागः – A

**(गद्यम् – पद्यम् – पूरकपाठाः)**

**( 62 अङ्काः )**

**I. एकवाक्येन उत्तरं लिखत –** **11x1=11**

1. सत्यव्रतशास्त्रिमहाभागः कदा कुत्र अजायत ?
2. लोके सदा किं शाम्यतु ?
3. वत्सराजः कदा भोजकुमारं गुरुकुलात् आनाययत् ?
4. किं किं शाश्वतं तिष्ठति ?
5. पुरुषार्थेषु अन्तिमः पुरुषार्थः कः ?
6. भारतीयाः कथं भिन्नमार्गम् आश्रिताः?
7. अञ्जना कीदृशं सुतं प्रासूत ?
8. लोकः केन ग्रथितः ?
9. मानवः कथं निर्वेदम् आदत्ते ?
10. आदित्यस्य नमस्कारात् किं भवति ?
11. रमणमहर्षेः मातापितरौ कौ ?

**II. चतुर्थपदं लिखत –** **4x1=4**

12. आम्रः – द्रुमः :: नागवल्ली – ___ ।
13. दशरथः – राजा :: सुमन्त्रः – ___ ।
14. श्रीकृष्णः – धीरललितः :: श्रीरामः – ___ ।
15. सुरुचिः – सुन्दरी युवतिः :: सुनीतिः – ___ ।

**III. लघूत्तराणि संस्कृतभाषया लिखत –** **4x2=8**

16. भीष्मेण दैवपुरुषकारयोः विषये किमुक्तम् ?

17. सुमन्त्रप्रमुखाः दशरथाय किं व्यजिज्ञपन् ?

18. प्रजाभिप्रायं स्वीकृत्य चन्नम्मा राजारामं प्रति किम् अब्रवीत् ?

19. संस्कृतभाषाविषये डा॥ सत्यव्रतशास्त्रिमहोदयस्य आशयः कः ?

**अथवा**

डा॥ सत्यव्रतशास्त्रिमहोदयेन प्राप्ताः देशीयाः प्रशस्तयः काः ?

**IV. श्लोकतात्पर्यं कर्णाटकभाषया आङ्ग्लभाषया संस्कृतभाषया वा लिखत – 2x2=4**

20. यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥

21. शारीरा वैणवाश्चैव सप्त षड्जादयः स्वराः ।
निषादर्षभगान्धारमध्यपञ्चमधैवताः ॥

**अथवा**

नायिकाश्चैव वक्ष्यामि चतस्रः पुनरेव तु ।
दिव्या च नृपपत्नी च कुलस्त्री गणिका तथा ॥

**V. कव्योः देश–काल–कृतीनां विषये लिखत । 2x3=6**

22. डा॥ के. एस्. नटराजन्

23. भासः

**VI. यथानिर्देशम् उत्तरं लिखत । 3x3=9**

24. सः महर्षिः धर्मात्मा उदारश्च ।

कः पाठः ? कः अवदत् ? धर्मात्मा कः ?

25. सहसा वह्निम् आविश ।

कः पाठः ? के ऊचुः ? कम् ऊचुः ?

26. रसे गन्धे न रज्यते ।

कः पाठः ? कः अवदत् ? कः न रज्यते ?

**अथवा**

किंस्वित् श्रेष्ठतरं भवेत् ?

कः पाठः ? कः अपृच्छत् ? कम् अपृच्छत् ?

**VII. दशभिः वाक्यैः कर्णाटकभाषया आङ्ग्लभाषया संस्कृतभाषया वा उत्तरं लिखत – 3x4=12**

27. सूर्यचन्द्रयोः विषये अस्माकं पूर्वजानां सिद्धान्तः कः ? विवृणुत ।

**अथवा**

चतुर्विधवृक्षाणां विषयेवृक्षायुर्वेदग्रन्थानुसारं लिखत ।

28. हनूमतः जननं बाल्यवृत्तान्तं च पद्यानुगुणं लिखत ।

29. "भारतं संरक्षितुं सन्नद्धः योद्धा हिमवान्" कथम् ? इति विवृणुत ।

**VIII. श्लोकपूरणं कुरुत –** **1x4=4**

30. मनीषिणः -- -- -- -- -- -- --

-- -- -- -- -- -- -- -- -- ।

-- -- -- -- -- -- -- -- --

-- -- -- -- -- -- -- दुर्लभम् ॥

**IX. अघोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरयत –** **4x1=4**

31. कस्मिंश्चित् ग्रामे कश्चन वणिक् आसीत् । तस्य गृहस्य प्राङ्गणे प्रतिदिनम् एकः काकः आगत्य तत्र पतितम् उच्छिष्टं खादति स्म । वणिजः गृहजनानां सर्वेषां तस्य काकस्य परिचयः आसीत् । कदाचित् तत्र केचन हंसाः आगत्य अवदन् – " वयं मानससरोवरात् उड्डयनं कुर्वन्तः आगताः "इति । तत् श्रुत्वा वणिजः गृहस्य बालकाः काकं दर्शयित्वा उक्तवन्तः – " एषः काकोऽपि बहु दूरम् उड्डयते । अपि च बहुविधान् उड्डयनप्रकारान् अपि जानाति "इति ।

i) वणिक् कुत्र आसीत् ?

ii) काकः किं खादति स्म ?

iii) हंसाः कुतः आगताः ?

iv) काकस्य परिचयः केषाम् आसीत् ?

## भागः – B

**(व्याकरणविभागः)**

**( 22 अङ्काः )**

**X. अधोलिखित–प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह उत्तरपत्रिकायां लिखत –** **10 x1=10**

32. शिष्टः – अस्य विरुद्धार्थकपदम् इदं भवति –

A) विशिष्टः B) दुष्टः

C) सशिष्टः D) प्रशिष्टः

33. सत्यव्रतशास्त्रिमहोदयः लाहोर्नगरे अजायत । रेखाङ्कितपदस्य समुचितं प्रश्नवाचकपदम् इदं भवति –

A) कुत्र B) कदा

C) कति D) कथम्

34. अत्र व्याकरणशुद्धवाक्यम् इदं भवति –

A) वीरस्य युद्धं रोचते B) वीरं युद्धं रोचते

C) वीरेण युद्धं रोचते D) वीराय युद्धं रोचते

35. तैरपि – अत्र एषः सन्धिः वर्तते –

A) विसर्गसन्धिः B) वृद्धिसन्धिः

C) अनुनासिकसन्धिः D) जश्त्वसन्धिः

36. राजा – अस्य स्त्रीलिङ्गरूपम् इदं भवति ।

A) राजी B) राज्ञी

C) राजनि D) रानी

37. यतिष्ये – अत्र एषः पुरुषः वर्तते –

A) प्रथमपुरुषः B) मध्यमपुरुषः

C) उत्तमपुरुषः D) अन्यपुरुषः

38. सर्वाणि – अत्र एषा विभक्तिः वर्तते –

A) प्रथमाविभक्तिः  B) तृतीयाविभक्तिः

C) चतुर्थीविभक्तिः  D) पञ्चमीविभक्तिः

39. जलम् – अस्य समानार्थकपदम् इदं भवति –

A) तापः  B) आपः

C) शापः  D) चापः

40. क्रियते – अत्र एषः लकारः वर्तते –

A) लङ्लकारः  B) लट्लकारः

C) लिङ्लकारः  D) लिट्लकारः

41. नैकेन – अत्र सन्धिविभजनम् एवं भवति –

A) नै + केन  B) न + एकेन

C) न + इकेन  D) नैक + इन

**42. प्रयोगपरिवर्तनं कुरुत –** **1x2=2**

a) स्त्रियः आभरणानि धृतवत्यः ।

b) त्वया किं खाद्यते ?

**43. विग्रहवाक्यं विलिख्य समासनाम लिखत –** **1x2=2**

a) मार्गान्तरम् ।

b) धनधान्यतैललवणानि ।

**अथवा**

**समासं कृत्वा नाम लिखत –**

a) गृहंगृहं प्रति ।

b) चक्रं पाणौ यस्य सः ।

**44. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत –** **1x2=2**

a) माता क्षीरम् आनीतवती ।

b) छात्रः अध्येतुंशालां गच्छति ।

**XI. वाक्ये विद्यमानम् अलङ्कारं सलक्षणं विवृणुत –** **3**

45. इन्दुः इन्दुरिव श्रीमान् ।

**XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत –** **3**

46. मातेव रक्षति पितेव हिते नियुङ्क्ते ।

## भागः – C

### (रचना विभागः)

### ( 16 अङ्काः )

**XIII. संस्कृतभाषया अनुवादं कुरुत –** **3**

47. ಧೈರ್ಯವು ಎಲ್ಲಾ ಕಡೆ ಸಾಧನವಾಗಿದೆ. ಧೈರ್ಯದಿಂದ ಎಲ್ಲ ಕೆಲಸಗಳನ್ನೂ ಸಾಧಿಸಲು ಸಾಧ್ಯ. ಆದ್ದರಿಂದ ವಿದ್ಯಾರ್ಥಿಗಳು ಧೈರ್ಯವಂತರಾಗಲು ಪ್ರಯತ್ನವನ್ನು ಮಾಡಬೇಕು.

**XIV. कर्णाटभाषया आङ्ग्लभाषया वा अनुवादं कुरुत –** **3**

48. अद्य बहुषु प्रदेशेषु अनावृष्टिः दृश्यते । एतेन न केवलं मानवाः किन्तु प्राणिनः पक्षिणः च क्लेशम् अनुभवन्ति । अतः जलस्य उपयोगः जागरूकतया करणीयः ।

**XV. पत्रं लिखत –** **5**

49. हासननगरस्य सर्वकारीय–विद्यालयस्य श्रीशः / श्राव्या इति मत्वा भगिन्याः विवाहार्थं दिनत्रयं विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति विरामपत्रं लिखत ।

**अथवा**

त्वं उडुपीनगरस्य शारदा प्रौढशालायाः रमेशः/ शमा इति मत्वा शैक्षणिकप्रवासस्य अनुभवं लिखन् / लिखन्ती पितरं प्रति पत्रं लिखत ।

**XVI. 50. एकं विषयम् अधिकृत्य प्रबन्धं लिखत –** **5**

**( i )** जनसङ्ख्यास्फोटः

**( ii )** परिसरः

**( iii )** समाचारपत्रम्